# shrIkAmeshvarastotram

# શ્રીકામેશ્વરસ્તોત્રમ્

## Document Information

Text title : kAmeshvarastotram

File name : kAmeshvarastotram.itx

Category : shiva, sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Location : doc_shiva

Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1 newer, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225

Latest update : March 25, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 30, 2023

*sanskritdocuments.org*

shrIkAmeshvarastotram

# શ્રીકામેશ્વરસ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

કકારરૂપાય કરાત્તપાશસૃણીક્ષુપુષ્પાય કલેશ્વરાય ।
કાકોદરસ્રગ્વિલસદ્ગલાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૧॥

કનત્સુવર્ણાભજટાધરાય સનત્કુમારાદિસુનીડિતાય ।
નમત્કલાદાનધુરન્ધરાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૨॥

કરામ્બુજાતમ્રદિમાવધૂતપ્રવાલગર્વાય દયામયાય ।
દારિદ્ર્યદાવામૃતવૃષ્ટયે તે કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૩॥

કલ્યાણશૈલેષુધયેઽહિરાજગુણાય લક્ષ્મીધવસાયકાય ।
પૃથ્વીરથાયાગમસૈન્ધવાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૪॥

કલ્યાય બલ્યાશરસઙ્ઘભેદે તુલ્યા ન સન્ત્યેવ હિ યસ્ય લોકે ।
શલ્યાપહર્ત્રે વિનતસ્ય તસ્મૈ કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૫॥

કાન્તાય શૈલાધિપતેઃ સુતાયાઃ ઘટોદ્ભવાત્રેયમુખાર્ચિતાય ।
અઘૌઘવિધ્વંસનપણ્ડિતાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૬॥

કામારયે કાઙ્ક્ષિતદાય શીઘ્રં ત્રાત્રે સુરાણાં નિખિલાદ્ભયાચ્ચ ।
ચલત્ફણીન્દ્રશ્રિતકન્ધરાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૭॥

કાલાન્તકાય પ્રણતાર્તિહન્ત્રે તુલાવિહીનાસ્યસરોરુહાય ।
નિજાઙ્ગસૌન્દર્યજિતાઙ્ગજાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૮॥

કૈલાસવાસાદરમાનસાય કૈવલ્યદાય પ્રણતવ્રજસ્ય ।
પદામ્બુજાનમ્રસુરેશ્વરાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૯॥

હતારિષટ્કૈરનુભૂયમાનનિજસ્વરૂપાય નિરામયાય ।
નિરાકૃતાનેકવિધામયાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૧૦॥

હતાસુરાય પ્રણતેષ્ટદાય પ્રભાવિનિર્ધૂતજપાસુમાય ।

પ્રકર્ષદાય પ્રણમજ્જનાનાં કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૧૧॥

હરાય તારાધિપશેખરાય તમાલસઙ્કાશગલોજ્જ્વલાય ।
તાપત્રયામ્ભોનિધિવાડવાય કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૧૨॥

હૃદ્યાનિ પદ્યાનિ વિનિઃસરન્તિ મુખામ્બુજાદ્યત્પદપૂજકાનામ્ ।
વિના પ્રયત્નં કમપીહ તસ્મૈ કામેશ્વરાયાસ્તુ નતેઃ સહસ્રમ્ ॥ ૧૩॥

ઇતિ શ ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીકામેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*shrIkAmeshvarastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*